नं० ५३६३-घ

केनोपनिषत्

पत्राणि ४

नं० ५२

5373
F. = 4
Complete

[illegible] नं० ५२६३-प

वेद केनोपनिषत (वेद)

केनोपनिषदम् प. ४ (वेद)

पत्राणि ४ (चत्वारि) (संपूर्णम्)

लिपिक: पं. कुञ्जलाल: संवत १९५५

नं. ५६



नं० ५२

केनोपनिषत

४ पत्र

सं. १९५५

लिपिका: पं कुञ्जलाल:

श्री· ॐश्रीगणेशायनमः ॐकेनेषितंपततिप्रेषितंमनः
१ केनप्राणःप्रथमःप्रैतियुक्तः केनेषितांवाचमिमांवदंति
चक्षुःश्रोत्रंकऽउदेवोयुनक्ति १ श्रोत्रस्यश्रोत्रंमनसोम
नोयद्वाचोहवाचंसउ प्राणस्यप्राणः चक्षुषश्चक्षुरति
मुच्यधीराः प्रेत्यास्माल्लोकादमृताभवंति २ नतत्रच
क्षुर्गच्छतिनवाग्गच्छतिनोमनोनविद्मोनविजानीमोय-
८ थैतदनुशिष्या[illegible]न्यदेवतद्विदितादथोअविदितादधि
इतिशुश्रुमपूर्वेषांयेनस्तद्व्याचचक्षिरे ३ यद्वाचाऽनभ्युदि-
तंयेनवागभ्युद्यते तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपास

ते यन्मनसानमनुतेयेनाहुर्मनोमतं तदेवब्रह्मत्वंवि-
द्धिनेदंयदिदमुपासते यच्चक्षुषानपश्यतियेनचक्षूंषिप
श्यति तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासते। यच्छ्रोत्रेणन
शृणोतियेनश्रोत्रमिदंश्रुतं। तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपा
सते। यत्प्राणेननप्राणितियेनप्राणःप्रणीयते। तदेवब्रह्मत्वं
विद्धिनेदंयदिदमुपासते॥ इतिप्रथमःखण्डः॥१॥ ॥
यदिमन्यसेसुवेदेतिदभ्रमेवापिनूनं। त्वंवेत्थ ब्रह्मणोरूपंयद श्री ३
स्यत्वंयदस्यदेवेष्वथनुमीमांस्यमेवतेमन्येविदितं। नाहंमन्ये
सुवेदेतिनोनवेदेतिवेदच। योनस्तद्वेदतद्वेदनोनवेदेतिवेदच।

श्री: २

यस्यामतंतस्यमतंमतंयस्यनवेदसः ।अविज्ञातंविजान-
तांविज्ञातमविजानतां प्रतिबोधविदितंमतममृतत्वंहि
विंदते आत्मनाविंदतेवीर्यंविद्ययाविंदतेमृतं इहचेद
वेदीदथसत्यमस्तिनचेदिहावेदीन्महतीविनष्टिः भूते
५५·भूतेषु षुविचित्यधीराःप्रेत्यास्माल्लोकादमृताभवंति ॥ इतिद्वि
तीयःखण्डः॥ २ ॥ ॥ ब्रह्महदेवेभ्योविजिग्ये ।तस्यह-
ब्रह्मणोविजयेदेवाअमहीयंत। तऐक्षंतास्माकमेवायंविज
योस्माकमेवायंमहिमेति । तद्धैषांविजज्ञौतेभ्योहिप्रादुर्ब
भूवतन्नव्यजानंतकिमिदंयक्षमितितेग्निमब्रुवन् ।जात

वेद एतद्विजानीहि किमेतद्यक्षमिति। तथेति तदभ्यद्रव
त्तमभ्यवदत्कोसीत्यग्निर्वा अहमस्मीत्यब्रवीज्जातवेदा वा अ
हमस्मीति तस्मिंस्त्वयि किं वीर्यमित्यपीदं सर्वं दहेयं यदिदं पृ
थिव्यामिति तस्मै तृणं निदधावेतद्दहेति तदुपप्रेयाय सर्व
जवेन तन्न शशाक दग्धुं स तत एव निववृते। नैतदशकं विज्ञा
तुं यदेतद्यक्षमिति अथ वायुमब्रुवन् वायवेतद्विजानीहि-
किमेतद्यक्षमिति तथेति तदभ्यद्रवत्तमभ्यवदत्कोसीति-
वायुर्वा अहमस्मीत्यब्रवीन्मातरिश्वा वा अहमस्मीति तस्मिं
स्त्वयि किं वीर्यमित्यपीदं सर्वमाददीयं यदिदं पृथिव्यामिति।

श्री: तस्मैन्तृणंनिदधावेतद्दहेति तदुपप्रेयायसर्वजवेनतंन
३ शशाकदग्धुं सततएवनिववृतेनैतदशकंविज्ञातुंयदेतद्य
क्षमिति अथेन्द्रमब्रुवन्मघवन्नेतद्विजानीहिकिमे तद्यक्ष
मिति तथेतितदभ्यद्रवत्तस्मात्तिरोदधे सतस्मिन्नेवाकाशे
स्त्रियमाजगामबहुशोभमानामुमांहैमवतीं तांहोवाचकि
मेतद्यक्षमिति ॥ इतितृतीयःखण्डः ॥ ३ ॥ ॥ ब्रह्मेतिहो
वाचब्रह्मणोवाएतद्विजयेमहीयध्वमिति ततोहैवविदां
चकारब्रह्मेति तस्माद्वाएतेदेवाअतितरामिवान्यान्देवान्
यदग्निर्वायुरिन्द्रस्तेह्येनंनेदिष्ठं पस्पर्शुस्तेह्येनत्प्रथमोविदांच

कारब्रह्मेति तस्माद्वाइंद्रोअतितरामिवान्यान्देवान् सह्येनन्ने
दिष्टंपस्पर्शसह्येनत्प्रथमोविदांचकारब्रह्मेति तस्यैषआदेशो
यदेतद्विद्युतो३व्यद्युतदा३ इती३न्यमीमिषदा३इत्यधिदैवत
मथाध्यात्मं(यदेतद्गुपासितव्यं सर्वेन) यदेतद्गच्छतीवच
मनोनेनचैतदुपस्मरत्यभीक्ष्णं संकल्पस्तद्धतद्वनंनामत
द्वनमित्युपासितव्यं सयएतदेवंवेदाभिहैनंसर्वाणिभूता
निसंवांछंतीत्युपनिषदंभोब्रूहीत्युक्तातउपनिषत् । ब्रा
ह्मींवावतउपनिषदमब्रूमेति तस्यैतपोद मः कर्मेतिप्र
तिष्ठावेदाःसर्वांगानिसत्यमायतनंयोवाएतामेवंवेदापह

श्री· स पाप्मानमनंते स्वर्गे लोके ज्येये प्रतितिष्ठति प्रतितिष्ठति ॥
४ इतिचतुर्थः खण्डः ॥ ४ ॥ ॥ आप्यायंतु ममांगानि वाक्प्राण
श्चक्षुः श्रोत्रमथो बलमिंद्रियाणि च सर्वाणि सर्वं ब्रह्मोपनि
षदं माहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकर
णमस्त्वनिराकरणं मेऽस्तु तदात्मनि निरते य उपनिषत्सु
धर्मास्ते मयि संतु ते मयि संतु ॐ शांतिः शांतिः शांतिः ॥
इति तल्वकारशाखायां केनोपनिषत्समाप्तः ॥ सामवेद
नु उपनिषत् छे ॥ ब्रह्मानंदनु छे ॥ लिखितं पं· कुञ्जलाले
न जंबूपत्तने शुभं सं· १९५५ मघेरप्र· १ ॥ श्रीराजारामसिंह·